**सैन्धवखिल** न० सैन्धवमेव खिलम् । सैन्धवशिलाशकलसमे चिदानन्दस्वरूपे परमेश्वरे “स यथा सैन्धवखिलमनन्तरमवाह्यं रसघनम्” शत०ब्रा०१४।७।३।१२ ।

**सैन्धी** स्त्री तालादिनिर्यासे राजनि० ।

**सैन्य** पु० सेनायां समवैति ञ्य । १मिलिते हस्त्यश्वादौ अमरः । सेनानां सङ्घः ष्यञ् । २सेनासमुदाये न० ।

**सैरन्ध्री** स्त्री सीरं हलं धरति धृ-मूल० क मुम् च सीरन्ध्रः कर्षकस्तस्येदं शिल्पकर्म अण् तदस्त्यस्य अच् गौरा० ङीष् । परगृहस्थे स्ववशे शिल्पकारिणि स्त्रीभेदे हेमच० पृषो० सैरिन्ध्रीत्यप्यत्र अमरः ।

**सैरिक** पु० सीरेण लाङ्गलेन खनति भूमिं सीरं वहति वा ठक् । १कर्षके हालिके अमरः । २लाङ्गलवोढरि वृषे (हालेर गरु) अमरः ।

**सैरिभ** पुंस्त्री० सीरे हले तद्वहने इभ इव शूरत्वात् शाक० ततः स्वार्थेऽण् । १महिषे अमरः स्त्रियां ङीष् । “सेवे सैरिभमर्दिनीमिह महालक्ष्मीम्” महालक्ष्मीध्यानम् । २स्वर्गे त्रिका० । [भिण्ट्याम् शब्दर० स्वार्थे क तत्रैव ।

**सैरीय** पु० सीरस्येदम् अण् सैरं हलाकारमर्हति छ ।

**सैरेय** पु० सैरं सीराकारमर्हति ढक् । १भिण्ट्याम् शब्दर० ढकञ् । सैरेयकोऽप्यत्र राजनि० ।

**सैवाल** न० सेवायै मीनादीनामुपभोगाय अलति पर्य्याप्नोति अच् सेवालं ततः स्वार्थे अण् । शैवाले स्वार्थे क । तत्रैव “या पांशुपाण्डुरवपुर्विरसा पुरासीत् सैवालकाङ्कुरवतामधुना बिभर्त्ति” उद्भटपद्ये श्लेषात् दन्त्यादि

**सोढ़** त्रि० सह-क्त इडभावः । १क्षान्ते तितिक्षिते अमरः कर्त्तरि क्त । २शीतादिसहनशीले त्रि० । [शीले मेदि० ।

**सोढृ** त्रि० सह-तृच् वा इडभावः । १सहनकर्त्तरि २क्षमा-

**सोत्कण्ठ** त्रि० सह उत्कण्ठया सहस्य सः । कौतुहलकान्विते अभीष्टलाभेच्छया विलम्बासहिष्णुत्वयुक्ते जटा० ।

**सोत्प्रास** न० उद्+प्र-अस-घञ् सह उत्प्रासेन सहस्य सः सोल्लुण्ठने अन्यार्थकस्य वाक्यस्य अन्यार्थकत्वकल्पनया तदुत्तरार्थके १वाक्ये २प्रियवाक्ये च शब्दर० । ३सशब्दहासेन सहिते त्रि० ।

**सोदय** त्रि० सह उदयेन प्रादुर्भावेण वृद्ध्या वा सहस्य सः १प्रादुर्भूते २वृद्धि(सुद)युक्ते ३लाभयुक्ते च “व्ययं दद्याच्च सोदयम्” स्मृतिः । [भ्रातरि २तादृशभगिन्यां स्त्री शब्दर०

**सोदर** पु० समानमुदरं यस्य समानस्य सः । १एकोदरभवे

**सोदर्य्य** पु० समाने उदरे शयितः यत् सादेशः । १एकोदरजाते भ्रातरि । २तादृशभगिन्यां स्त्री अमरः ।

**सोनह** न०सु-विच् सवे नह्यते नह घञर्थे क । लशुने शब्दर०

**सोन्माद** पु० सह उन्मादेन सादेशः । उन्मत्ते उन्मादिष्णौ ।

**सोपप्लव** पु० सह उपप्लवेन सादेशः । समाक्रान्तभूच्छायेन राहुणा योगरूपोप्लवसहिते १चन्द्रे तथाभूतचन्द्रच्छायायोगयुक्ते २सूर्य्ये च अमरः । ३उपद्रवयुते त्रि० । चन्द्रार्कयोर्ग्रासकारणमुपरागशब्दे प्रायेणोक्तं देवीपुराणोक्तमधिकमत्रोच्यते ।

“ब्रह्मोवाच “यदयं वदते लोको वाशिष्ठत्वान्महामते ! । तदहं संप्रवक्ष्यामि चन्द्रसूर्य्योपरागिकम् । यदि सत्यमयं प्रत्यक्षे ज्योतिराशिर्दिवाकरः । तत्कथं नोदरस्थेन राहुणा भस्मसात् कृतः । अथ वा राहुणाक्रम्य निजवक्त्रं प्रवेशितः । तत्कथं दशनैस्तीक्ष्णैः शतधा न विखण्डितः । विमुक्तश्च पुनर्दृष्टस्तथैवाखण्डमण्डलः । न चास्यापहृतं तेजो न स्थानादपसारितः । यदि वा क्षोभ निष्पीतः कथं दीप्ततरोऽभवत् । तस्मान्न तेजसां राशी राहोर्वक्त्रं गमिष्यति । भक्ष्यार्थं सर्वदेवानां सोमः सृष्टः स्वयम्भुवा । तत्रस्थममृतञ्चापि सम्भूतं सूर्य्यतेजसा । पिबन्त्यमृतमयं देवाः पितरश्च स्वधाऽमृतम् । त्रयश्च त्रिशतश्चैव त्रयस्त्रिंशत्तथैव च । त्रयश्च त्रिसहस्राश्च देवाः सोमं पिबन्ति ये । राहोरप्यमृतं भागः पुरा सृष्टं स्वयम्भुवा । तस्मात्सद्राहुरागत्य पातुमिच्छति पर्वसु । उद्धृत्य पार्थिवीं छायामभ्राकारां तमोमयः । पातुमिच्छन् ततश्चेन्दुमाच्छादयति छायया । शुक्ले च चन्द्रमभ्येति कृष्णे पर्वणि भास्करम् । सूर्य्यमण्डलसंस्थन्तु चन्द्रमेव जिघांसति । तस्मात् पिबति तं राहुस्त्वमृतं विनाशयन् । अविहिंसन् यथा पद्मं पिबति भ्रमरो मधु । चन्द्रस्थममृतं तद्वदभेदाद्राहुरश्नुते । चन्द्रकान्तो मणिर्यद्वत् छिन्नं क्षरते जलात् । क्षरन्नपि न हीयेत तेजसा नैव मुच्यते । यथा सूर्य्यमणिः सूर्य्यादुत्पाद्य पावकं शुभम् । न भवत्यङ्गहीनोऽपि तेजसा नैव मुच्यते । एवं चन्द्रश्च सूर्य्यश्च छादितावपि राहुणा । स्वतेजसा न मुच्येते नाङ्गहीनौ बभूवतुः । पर्वस्वथ च चन्द्रस्य माणिक्यकनकाकृतिः । सोमो दैवतसंयोगात् छाया योगाच्च पार्थिवात् । राहोश्च वरलब्ध्या वै प्रक्षरेदमृतं शशी । स्वदोहकाले सम्प्राप्ते वत्सं दृष्ट्वा च सौरभ्या । स्वाङ्गादेव क्षरेत् क्षीरं तथेन्दुः क्षरतेऽमृतम् । पितेव सूर्य्यो देवानां सोमो मातेव लक्ष्यते । यथा मातुःस्तनं